संस्कृत-वार्ता:

05/05/24

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभानिर्वाचनस्य तृतीयचरणस्य प्रचाराभियानमद्य समाप्तिमेष्यति। विभिन्नदलीयाः राजनैतिकनेतारः स्वस्वदलीयप्रत्याशिनां पक्षे प्राचुर्येण जनसभाः सम्बोधयन्ति।
- प्रधानमन्त्री भारतीयजनतापार्टी इति दलस्य च वरिष्ठनेता श्री नरेन्द्रमोदी अद्य उत्तरप्रदेशे स्वदलस्य पक्षे नैर्वाचनिकप्रचारं कुरुते।
- केन्द्रसर्वकारेण स्पष्टीकृतं यत् विश्वस्य एम्.आर्.एल्स्. इति अधिकतम-अवशेष-सीमानां कठोरतम-मानकेषु अन्यतमः मानकः भारते अस्ति।
- जम्मू-कश्मीरस्य सीमावर्ति-पूंछ-मण्डले ह्यः सायं भारतीय-वायुसेना-दलमुद्दिश्य आतंकवादिभिः आक्रमणं कृतम्, एतस्मिन् आतंकि-गतिविधौ संलिप्ततायाः सन्देहाधारेण आरक्षिबलेन षट्-स्थानीयजनाः अपि निगडिताः ।
- एथलेटिक्स-क्रीडायां अद्य अमेरिकादेशे यू.एस.ए.टी.एफ-क्रीडा-महोत्सवे पुरुषाणां उच्चकूर्दनस्पर्धायां भारतस्य तेजस्विन्-शङ्करः विजयं प्राप्नोत्।

<u>लोकसभानिर्वाचनस्य</u>

लोकसभानिर्वाचनस्य तृतीयचरणस्य प्रचाराभियानमद्य समाप्तिमेष्यति। विभिन्नदलीयाः राजनैतिकनेतारः स्वस्वदलीयप्रत्याशिनां पक्षे प्राचुर्येण जनसभाः सम्बोधयन्ति। अस्मिन् तृतीये चरणे दशराज्येषु केन्द्रशासितप्रदेशेषु तत्र च दादरा-नगर-हवेली-दमन-द्विपसमेतेषु त्रिनवतिनिर्वाचनक्षेत्रेषु मतदानं भविष्यति।

उत्तरप्रदेशे अद्य राजनैतिकगतिविधिः प्रचण्डतया दृश्यते यत्र च तृतीयचरणीय-निर्वाचनाय नैके प्रत्याशिनः मार्गप्रदर्शनं प्रतिगृहं गत्वा च प्रचारं कुर्वन्ति, द्वितीयचरणीय-निर्वाचनार्थं चापि गतिविधयः प्राचुर्येण दृश्यन्ते।

<u>प्रधानमन्त्री भारतीयजनतापार्टी</u>

प्रधानमन्त्री भारतीयजनतापार्टी इतिदलस्य च वरिष्ठनेता श्री नरेन्द्रमोदी अद्य राजनैतिकप्रचारार्थं उत्तरप्रदेशे वर्तन्ते। श्री मोदी केवलं इटावा-धौरहरा-निर्वाचनक्षेत्रेष्वेव राजनैतिकजनसभाः न सम्बोधयति अपितु अद्य सांयकाले अयोध्याजनपदे अपि एकं पथप्रदर्शनं करिष्यति। तत्र च द्विकिलोमीटर-परिमित-पथप्रदर्शनं सुग्रीवदुर्गतः आरप्यते अपि च

लताचतुष्पथं यावत् गत्वा समाप्तिमेष्यति। भाजपेतिदलस्य वरिष्ठनेता उत्तराखण्डस्य च मुख्यमन्त्री पुष्करसिंहधामी अपि वदायुंजनपदे पथप्रदर्शनं करिष्यति।

उत्तरप्रदेशकांग्रेस-प्रभारी अविनाशपाण्डे कौशाम्बीमध्ये दलीयप्रत्शाशिनः पक्षे प्रचारं करोति, उत्तरप्रदेशे दशासनानां कृतेमंगलवासरे मतदानं भविष्यति, तत्र संभल-हाथरस-आगरा-फतेहपुरसीकरी-फिरोजाबाद-मैनपुरी-एटा-वदायूं-आंवलावरेली इत्येतानि क्षेत्राणि सन्ति।

प्रधानन्त्री श्रीनरेन्द्रमोदी उत्तरप्रदेशानन्तरं दलीयप्रचारार्थं ओडिशायां प्रचारार्थं अद्य सांयं भुवनेश्वरं प्राप्स्यति, अवधेयं यत् ओडिशायाम अस्य मासस्य त्रयोदशदिनाङ्कात् चतुर्षु चरणेषु सहैव लोकसभाविधानसभानिर्वाचनं भविष्यति।

मध्यप्रदेशे राज्यस्य नवलोकसभा-आसनानां कृते नैर्वाचनिकप्रचारः अद्य सायं षड्वादनात् परं स्थगितो भविष्यति, एतेषु उक्तेषु लोकसभासनेषु मईमासस्य सप्तमे दिनाङ्के प्रातः सप्तवादनादारभ्य सांयं षड्वादनं यावत् मतदानं भविष्यति।

छत्तीसगढे येषु सप्तसु संसदीयक्षेत्रे मेमासस्य सप्तमे दिनाङ्के तृतीयचरणस्य मतदानं भविष्यति तदर्थं अद्य सांयकालात् पंचवादनात् नैर्वाचनिकप्रचारस्य उपशमनं भविष्यति, अवधेयं यत् विभिन्नराजनैतिकदलनेतारः मतदातृन् स्वीये पक्षे मतं कर्तुं प्रयत्नरताः दरीदृश्यन्ते।

<u>जम्मू-कश्मीरः</u>

जम्मू-कश्मीरस्य सीमावर्ति-पूंछ-मण्डले ह्यः सायं भारतीय-वायुसेना-दलस्य उपरि आतंकवादिभिः) आक्रमणं कृतम् तत्र एतस्मिन् गतिविधौ लिप्ततायाः सन्देहाधारेण आरक्षिबलेन षट्-स्थानीयजनाः निगडिताः । एते स्थानीयजनाः आक्रमणे आतंकवादिनां कृते साहाय्यं कृतवन्तः इत्याशंका वर्तते । अवधेयमस्ति यत् अस्मिन् आततायी-आक्रमणे पञ्च-वायुसेना-सैनिकाः घातिताः एकश्च वीरगतिं प्राप्तवान् ।

<u>चत्वारः भारतीयाः मुष्टिक्रीडकाः</u>

चत्वारः भारतीयाः मुष्टिक्रीडकाः आकाशगोरखा, विश्वनाथसुरेशः निखिलः प्रीतमलिकश्च ह्यः रात्रौ  कजाकिस्तानस्य अस्तानामध्ये एएसबीसी-एशियन- यू द्वाविंशः अपि च यूथबाक्सिंग-चैम्पियन-शिप द्विसहस्रचतुर्विंशति इत्यस्मिन् उपर्युक्ताः चत्वारः अपि क्रीडकाः द्वाविंशवयोमितक्रीडावर्गस्य अन्त्यचक्रं प्रविष्टवन्तः सन्ति। उल्लेखनीयः अयमुपलब्धिः भारतस्य सर्वासु श्रेणीषु प्राप्तानां त्रयश्चत्वारिंशत् पदकानाम् ऐतिहासिकसंख्यायुता जाता वर्तते।

ओडिशा विधानसभा

काङ्ग्रेस-दलेन आगामि-ओडिशा-विधानसभा-निर्वाचनस्य कृते षट्-अभ्यर्थिनां सूची प्रकाशिता। दलेन जलेश्वरविधानसभा-आसनात् देबीप्रसन्ना-चन्दस्य स्थाने सुदर्शनदासः सुस्थापितः, अक्षय-आचार्यः नीलगिरी-आसनात् स्पर्धिष्यते । उम्मा-बल्लव-रथः सुजीत-महापात्रस्य स्थाने पुरी-विधानसभा-निर्वाचन-क्षेत्रे स्पर्धिष्यते। अथगढक्षेत्रे सुदर्शनसाहुः अथमल्लिक-क्षेत्रे च हिमांशु-चौलिया निर्वाचनार्थं स्पर्धिष्येते ।

केन्द्रः

केन्द्रसर्वकारेण स्पष्टीकृतं यत् विश्वस्य एम्.आर्.एल्स्. इति अधिकतम-अवशेष-सीमानां कठोरतम-मानकेषु अन्यतमः मानकः भारते अस्ति तथा च कीटनाशकानां मानकः भिन्न-भिन्न-खाद्यवस्तूनाम् कृते तेषाम् उत्तरदायि-मूल्याङ्कनस्य आधारेण भिन्नरूपेण निर्धारितः भवति। कृषिमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् भारतस्य खाद्य-सुरक्षा-मानक-प्राधिकरणेन वनस्पतिषु उपस्कर-पदार्थेषु च दश-गुणाधिकं कीटनाशकस्य अनुमतिः प्रदीयते इति, संचारतन्त्रैः यः आरोपः सम्प्रति संस्थापितः, सः असत्याधारितः दुर्भावनापूर्णश्च अस्ति । कीटनाशकानां नियमनं कृषिमन्त्रालयेन कीटनाशक-विधेयकान्तर्गतं संघटितस्य केन्द्रीय-कीटनाशक-मण्डलस्य, पञ्जीकरणसमित्याः च माध्यमेन भवति ।

गृहमन्त्री अमितशाहः

केन्द्रीयगृहमन्त्री तथा च भाजपादलस्य वरिष्ठनेता श्री-अमितशाहः आन्ध्रप्रदेशस्य हिन्दुपुर-लोकसभा निर्वाचनक्षेत्रस्य धर्मवरम् इत्यस्मिन् अद्य अपराह्णे निर्वाचनप्रचारे भागं गृहीतवान् । श्री-शाहः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रधानमन्त्री-निर्धन-कल्याण-योजनायाः अन्तर्गतम् अशीति-कोटिजनेभ्यः निःशुल्कम् आहारधान्यं प्राप्तम्, आयुष्मान-भारत-योजनायाः अन्तर्गतं पञ्चाशत्-कोटिजनैः पञ्चलक्षरूप्यकाणां स्वास्थ्यलाभश्चापि प्राप्तः । सः उक्तवान् यत् देशे त्रिंशदुत्तर-एक-शत-कोटिजनेभ्यः कोविड्-सूच्यौषधं निःशुल्करूपेण प्रदत्तम् । सः आन्ध्रप्रदेशस्य वर्तमानमुख्यमन्त्री वाई.एस.जगनमोहन-रेड्डी इत्यस्य आलोचनां कृतवान् यत् सः विकासस्य उपेक्षां कृत्वा राज्ये निवेशम् आकर्षयितुं असफलः अभवत्। श्री शाहः अवदत् यत् चन्द्रबाबूनायडु इत्यादयः अनुभविनो नेतारः राज्यस्य समग्रविकासं सुनिश्चित्य आन्ध्रप्रदेशस्य द्विविभाजनोत्तरस्य आधारं स्थापितवन्तः, ते अवश्यमेव निर्वाचिताः भवेयुः। सः आश्वासनं दत्तवान् यत् केन्द्रे एन.डी.ए-सर्वकारः पोलावरम्, हण्ड्री-नीवा परियोजनानां परिपूर्तये सर्वं सम्भवं समर्थनं प्रदास्यति येन कृषकाणां

समृद्धिः भविष्यति। सः जनसमूहम् अभ्यर्थितवान् यत् चत्वारिंशदुत्तर-द्विसहस्र-तमवर्षपर्यन्तं विकसितभारतस्य लक्ष्यं प्राप्तुं एनडीए-घटबन्धनस्य समर्थने जनाः मतदानं कुर्युः ।

<u>भारतीय ऋतु-विज्ञान-विभागः</u>

भारतीय-ऋतु-विज्ञान-विभागेन पूर्वोत्तरभारते अद्य श्वः च अत्यधिक-वृष्टीतः अत्यन्तं प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति । विभागेन इदमपि प्रोक्तं यत् आगामिनिषु पञ्चदिनेषु अरुणाचलप्रदेश-असम-मेघालय-सिक्किम-नागालैण्ड्,-मणिपुर-मिजोरम-त्रिपुरा राज्याणां केषुचित् क्षेत्रेषु वज्रपातैः, सह आकाशीयविद्युत्-प्रचण्डवायु-प्रवाहेण सह च व्यापकवृष्टिः भवितुं शक्नोतीति अनुमीयते। ऋतुविज्ञानविभागेन आगामिनिषु पञ्चदिनेषु वायव्य-मध्यभारतस्य अनेकभागेषु अधिकतम-तापमानस्य द्विचतुः-डिग्री-सेल्सियस-मित-पर्यन्तं वृद्धिः भविष्यति इत्यपि पूर्वानुमानं कृतम् अस्ति। विभागेन योजितं यत् दिल्ल्याम् अद्य नभोमण्डलं निर्मलं वर्तते । अधिकतमं न्यूनतमं च तापमानं एकचत्वारिंशत् अथ द्वाविंशतिः डिग्री सेल्सियसपर्यन्तं जायते।

<u>आई.पी.एल् क्रिकेट्</u>

आई.पि.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायाम् अद्य धर्मशालायाः हिमाचल-प्रदेश-क्रिकेट्-क्रीडाङ्गणे पञ्जाब-किङ्ग्स्-चेन्नै-सुपर-किङ्ग्स् दलयोः मध्ये स्पर्धा प्रवर्तते । चेन्नै-सुपर-किङ्ग्स् दलेन विंशति-क्षेपचक्रेषु सप्त-षष्ट्युत्तर-एकशतं धावनांकाः समार्जिताः । अन्तिम-सूचना-पर्यन्तं पञ्जाब-किङ्ग्स् दलेन षट्-क्षेपचक्रे क्रीडकद्वयहानौ सप्तचत्वारिंशत् धावनांकाः समार्जिताः सन्ति ।

अद्य सायंकाले द्वितीयक्रीडायां लखनऊ-नगरस्य एकाना-क्रिकेट्-क्रीडाङ्गणे लखनऊ-सुपर-जायन्ट्स् अथ कोलकाता-नाइट्-राइडर् दलयोः मध्ये स्पर्धा भविष्यति ।

।। इति वार्ता: ।।